# श्रीमद् भागवत रसिक कुटुंब

## श्री राधा स्तोत्र उद्धव कृत

**उद्धव उवाच**

**वन्दे राधापदाम्भोजं ब्रह्मादिसुरविन्दतम् ।**
**यत्कीर्तिः कीर्तनेनैव पुनाति भुवनत्रयम् ॥ 1॥**

**नमो गोकुलवासिन्यै राधिकायै नमो नमः ।**
**शतशृङ्गनिवासिन्यै चन्द्रावत्यै नमो नमः ॥ 2॥**

**तुलसीवनवासिन्य वृन्दारण्यै नमो नमः ।**
**रासमण्डलवासिन्यै रासेश्वर्यै नमो नमः ॥ 3॥**

**विरजातीरवासिन्यै वृन्दायै च नमो नमः ।**
**वृन्दावनविलासिन्यै कृष्णायै च नमो नमः ॥ 4॥**

**नमः कृष्णप्रियायै च शान्तायै च नमो नमः ।**
**कृष्णवक्षःस्थितायै च तत्प्रियायै नमो नमः ॥ 5॥**

**नमो वैकुण्ठवासिन्यै महालक्ष्म्यै नमो नमः ।**

विद्याधिष्ठातृदेव्यै च सरस्वत्यै नमो नमः ॥ 6॥

सर्वैश्वर्याधिदेव्यै च कमलायै नमो नमः ।
पद्मनाभप्रियायै च पद्मायै च नमो नमः ॥ 7॥

महाविष्णोश्च मात्रे च पराद्यायै नमो नमः ।
नमः सिन्धुसुतायै च मर्त्यलक्ष्मयै नमो नमः ॥ 8॥

नारायणप्रियायै च नारायण्यै नमो नमः ।
नमोऽस्तु विष्णुमायायै वैष्णव्यै च नमो नमः ॥ 9॥

महामायास्वरूपायै सम्पदायै नमो नमः ।
नमः कल्याणरूपिण्यै शुभायै च नमो नमः ॥ 10॥

मात्रे चतुर्णां वेदानां सावित्र्यै च नमो नमः ।
नमोऽस्तु बुद्धिरूपायै ज्ञानदायै नमो नमः ॥ 11॥

नमो दुर्गविनाशिन्यै दुर्गादेव्यै नमो नमः ।
तेजःसु सर्वदेवानां पुरा कृतयुगे मुदा ॥ 12॥

अधिष्टानकृतायै च प्रकृत्यै च नमो नमः ।
नमस्त्रिपुरहारिण्यै त्रिपुरायै नमो नमः ॥ 13॥

सुन्दरीषु च रम्यायै निर्गुणायै नमो नमः ।

नमो निद्रास्वरूपायै निर्गुणायै नमो नमः ॥ 14॥

नमो दक्षसुतायै च नमः सत्यै नमो नमः ।
नमः शैलसुतायै च पार्वत्यै च नमो नमः ॥ 15॥

नमो नमस्तपस्विन्यै ह्युमायै च नमो नमः ।
निराहारस्वरूपायै ह्यपर्णायै नमो नमः ॥ 16॥

गौरीलौकविलासिन्यै नमो गौर्यै नमो नमः ।
नमः कैलासवासिन्यै माहेश्वर्यैः नमो नमः ॥ 17॥

निद्रायै च दयायै च श्रद्धायै च नमो नमः ।
नमो धृत्यै क्षमायै च लज्जायै च नमो नमः ॥ 18॥

तृष्णायै क्षुत्स्वरूपायै स्थितिकर्त्र्यै नमो नमः ।
नमः संहाररूपिण्यै महामार्यै नमो नमः ॥ 19॥

भयायै चाभयायै च मुक्तिदायै नमो नमः ।
नमः स्वधायै स्वाहायै शान्त्यै कान्त्यै नमो नमः ॥ 20॥

नमस्तुष्ट्यै च पुष्ट्यै च दयायै च नमो नमः ।
नमो निद्रास्वरूपायै श्रद्धायै च नमो नमः ॥ 21॥

क्षुत्पिपासास्वरूपायै लज्जायै च नमो नमः ।

नमो धृत्यै क्षमायै च चेतनायै नमो नमः ॥ 22॥

सर्वशक्तिस्वरूपिण्यै सर्वमात्रे नमो नमः ।
अग्नौ दाहस्वरूपायै भद्रायै च नमो नमः ॥ 23॥

शोभायै पूर्णचन्द्रे च शरत्पद्मे नमो नमः ।
नास्ति भेदो यथा देवि दुग्धधावल्ययोःसदा ॥ 24॥

यथैव गन्धभूम्योश्च यथैव जलशैत्ययौः ।
यथैव शब्दनभसोर्ज्योतिः सूर्यकयोर्यथा ॥ 25॥

लोके वेदे पुराणे च राधामाधवयोस्तथा ।
चेतनं कुरु कल्याणि देहि मामुत्तरं सति ॥ 26॥

इत्युक्त्वा चोद्धवस्तत्र प्रणनाम पुनः पुनः ।
इत्युद्धवकृतं स्तोत्रं यः पठेद्भक्तिपूर्वकम् ॥ 27॥

इह लोके सुखं भुक्त्वा यात्यन्ते हरिमन्दिरम् ।
न भवेद्बन्धुविच्छेदो रोगः शोकः सुदारुणः ॥ 28॥

प्रोषिता स्त्री लभेत्कान्तं भार्याभेदी लभेत्प्रियाम् ।
अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् ॥ 29॥

निर्भूमिर्लभते भूमिं प्रजाहीनो लभेत्प्रजाम् ।

रोगाद्विमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥ 30॥

भयान्मुच्येत भीतस्तु मुच्येताऽऽपन्न आपदः ।
अस्पष्टकीर्तिः सुयशा मूर्खो भवति पण्डितः ॥ 31॥

इति श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे उत्तरे
द्विनवतितमाध्यायान्तर्गतं उद्धवकृतं राधास्तोत्रं समाप्तम् ।